# श्री सुरसरस्वती सभा शृङ्गेरि

## तुरीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः – 30-8-2015 अङ्काः–100

पूर्वाह्ले – 10-00 तः 1-00 पर्यन्तम् समयः–घण्टात्रयम्

**सूचना :** सर्वाणि उत्तराणि संस्कृते एव भवेयुः ।

**1 पञ्चप्रश्नानां एकवाक्येन उत्तरं लिखत ।** 5

1. कौत्सः कः ?
2. शिवगुरुः कं ययाचे ?
3. भगवतो जन्मकर्मणोः को हेतुः ?
4. नैष्कर्म्यसिद्धिग्रन्थं कः अरचयत् ?
5. जात्यन्धः कः ?
6. आदित्येन कुन्त्यां कः उत्पादितः ?
7. अभिमन्योः प्रपौत्रः कः ?
8. हंसं कः जग्राह ?

**2 पञ्च प्रश्नानामुत्तरं द्वित्रैः वाक्यैः लिखत ।** 10

1. रघुः कौत्सं कथं प्रत्युज्जगाम ?
2. शङ्कर इति नाम कथं सार्थकमासीत् ?
3. भगवतो विभूतिः कीदृशी ?
4. अम्बरस्थः चन्द्रः कथं बभ्राज ?
5. गिरिः गुरुसेवां कथं विदधौ ?
6. द्रुपदं दृष्ट्वा द्रोणः किमाह ?
7. सहस्रानीकः कः ? तं देवेन्द्रः किमुवाच ?

**3 द्वयोः पञ्चषैः वाक्यैः उत्तरं लिखत ।** 8

1. नीचमध्यमोत्तमाः के ?
2. पुत्रीयन् पाण्डुः कुन्तीं किमवोचत् ?



पश्चादनुवर्तते

3. इन्द्राग्नियमवरुणैः नलाय के के वराः दत्ता ?
4. हस्तामलकस्य पूर्ववृत्तं वर्णयत ।

**4** **वाक्यत्रयं सप्रसङ्गं विवृणुत ।** 9

1. भोः कुमाराः! पश्यत मे कौशलम् ।
2. विशिष्टयोस्सम्बन्धो हि गुणवान् भवति ।
3. राजन्! तव शापस्य विमोचनकालस्सन्निहितः ।
4. ग्रहाणां गतिरधुना प्रतिकूला मे दृश्यते ।
5. कोटीश्चतस्रो दश चाहरेति ।

**5** **द्वयोः भावं विशदयत ।** 8

1. जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्वौ ।
   गुरुप्रदेयाधिकनिस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ।।
2. प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम् ।
   अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम् ।।
3. ततस्स मध्यगतमंशुमन्तं ज्योत्स्नावितानं महदुद्वमन्तम् ।
   ददर्श धीमान् दिवि भानुमन्तं गोष्ठे वृषं मत्तमिव भ्रमन्तम्।।

**6** **श्लोकं पूरयत।** 4

1) विद्या नाम ........................................................... पशुः ।।
2) भवन्ति ..................................................परोपकारिणाम् ।।
3) प्रदानं प्रच्छन्नं ...................................................... इदम् ।।

**7** **एकस्य कवेः देशकालग्रन्थानधिकृत्य लिखत ।** 4

1) कालिदासः 2) लक्ष्मणसूरिः

**8** **एकस्य लघुटिप्पणिं लिखत ।** 4

1) द्रोणः 2) दमयन्ती

**9** **चत्वारि पदानि वाक्ये योजयत ।** 4

1) नयनानन्दकरः 2) अपृच्छत् 3) भुवनगुरुः
4) उत्तमगुणाः 5) युद्धे 6) पार्थिवः

**10** **चतुर्णां रूपाणि विवेचयत।** 4

1) कवयः 2) प्रमनाः 3) जग्राह

4) भानुमन्तम् 5) नियोज्य 6) दक्षता

**11** **चतुर्णां पर्यायपदानि लिखत ।** 4

1) अर्जुनः 2) हेलया 3) विष्णुपदी

4) जाम्बूनदम् 5) प्रणिपत्य 6) सुधर्मा

**12** **चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** 4

1) कुलवृद्धिः 2) सर्वलक्षणसम्पन्नः 3) पञ्चनली

4) दुरात्मा 5) सर्वशास्त्रेषु 6) मृगपक्षिणः

**13** **चतुर्णां सन्धिं विभज्य नाम लिखत ।** 4

1) यथावन्निश्चिन्वन् 2) उक्तिरियम् 3) तैस्सह

4) पौराश्च 5) तत्रागता 6) जगदीशः

**14** **द्वयोः व्याकरणविशेषं लिखत ।** 4

1) व्यजयत 2) हैडिम्बेयः 3) स्वस्त्यस्तु ते

4) भैमी 5) अलं सन्तापेन 6) कुतूहलितः

**15** **समासमेकं सलक्षणं विशदयत ।** 4

1) कर्मधारयसमासः

2) बहुव्रीहिसमासः

**16** **चतुर्थपदं लिखत ।** 4

1) विभाण्डकः – ऋष्यशृङ्गः :: पराशरः –

2) कुन्ती – पाण्डुः :: गान्धारी –

3) कौशाम्बी – शतानीकः :: कुण्डिनम् –

4) उदयनचरितम् – अनन्ताचार्यः :: आचार्यचरितम् –



पश्चादनुवर्तते

**17** **इतरवचनरूपाणि लिखत ।** 4

1) यतिराट् — —

2) — — वायूनाम्

3) — आत्मनोः —

4) रुदती — —

**18** **रिक्तस्थानं पूरयत ।** 4

1) .................. न परित्यजन्ति ।

2) अस्ति कुरुषु ............. नगरम् ।

3) सः यौवने वयसि .......... नाम कन्यामुपयेमे ।

4) लोकवृत्तसाक्षिणो देवाः ............. मे पतिं दिशन्तु ।

**19** **द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** 6

1. ववृधे 2. अपृच्छत् 3. मन्येत 4. आह

**20** **एकस्य प्रयोगपरिवर्तनं कुरुत ।** 2

1) वाल्मीकिना रामायणं विरचितम् ।

2) देवाः स्वं रूपं गृह्णन्तु ।

* * * *

# श्री सुरसरस्वती सभा शृङ्गेरि
## तुरीया परीक्षा
### द्वितीयपत्रिका

दिनाङ्कः – 30-8-2015 अङ्काः–50

अपराह्णे – 1-30 तः 3-00 पर्यन्तम् समयः–सार्धैकहोराः

**1** **विषयमेकम् अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत -** 5

1. महाभारतम् 2. परिसरः 3. विद्यार्थिजीवनम्

**2** **उत्तरयत -**

अ) **काव्यं नाम किम् ? अर्थाः कति ? विशदयत ।** 4

आ) **चतुर्थीविभक्तिः कदा भवति ? सोदाहरणं विवृणुत ।** 4

**3** इ) **उपमालङ्कारं सोदाहरणं निरूपयत ।** 4

ई) **'तमध्वरे विश्वजिति क्षितीशम्' अत्रत्यं वृत्तं सलक्षणं सप्रस्तारं च निरूपयत ।** 4

**3** **एकवाक्येन उत्तरं लिखत -** 4

1. 'सहयुक्तेऽप्रधाने' इति सूत्रानुसारेण का विभक्तिः भवति ?
2. अर्धविरामः कदा उपयुज्यते ?
3. आदिमध्यावसानेषु के लाघवं यान्ति ?
4. 'कृ' धातोः लुङ् प्रथमैकवचनं रूपं किम् ?

**4** **द्वयोः सर्वपुरुषवचनरूपाणि लिखत –** 6

1. जीयात् 2. वर्धिता
3. अध्यक्षत् 4. पेचे

**5** **वाक्यदोषं परिहरत ।** 4

1. वने अधितिष्ठति।
2. दण्डात् घटः ।
3. ग्रामस्य बहिः नदी प्रवहति ।
4. अयोध्ये दशरथः आसीत् ।



पश्चादनुवर्तते

**6** **द्वयोः प्रयोगपरिवर्तनं कुरुत –** 3

1. सूर्योदयात् तमः नश्यति ।
2. ललनाः स्नानाय नदीं गच्छन्ति ।
3. धनिकेन धनं दीयते ।

7 एकस्य **टिप्पणीं लिखत ।** 2

1. सति सप्तमी 2. निर्धारणम्

**8** **स्वोत्तरभाषया परिवर्तयत ।** 5

1. कुम्भकर्णेन विकटं जहसे रणमूर्धनि ।
2. इदं सर्वं वयं पूर्वमेव अवोचाम ।
3. कः खलु नाम प्रवचनसमये शब्दमकरिष्यत् ।
4. गुरोः प्रसादेन विद्वांसो भूयास्म ।
5. पूज्यानां माता विशिष्यिते ।

**11** **संस्कृतभाषया परिवर्तयत ।** 5

1. ಅವರು ದೇವರನ್ನು ಭಜಿಸಲಿ.
   let they pray god.
2. ಸತ್ಯವಾದಿಗಳಲ್ಲಿ ಹರಿಶ್ಚಂದ್ರ ಶ್ರೇಷ್ಠ.
   Among the truthful men, Harischandra is the greatest.
3. ಅಕ್ಕಸಾಲಿಗರು ಚಿನ್ನದಿಂದ ಒಡವೆಗಳನ್ನು ಮಾಡಿದರು.
   Goldsmiths made ornaments using gold.
4. ದುಷ್ಕಾರ್ಯವನ್ನು ನಿಲ್ಲಿಸು.
   Stop the bad work.
5. ಶರೀರಕ್ಕೆ ಒಡವೆ ಇದ್ದಂತೆ ಕಾವ್ಯಕ್ಕೆ ಅಲಂಕಾರ.
   Alankara to Kavya is like ornaments to the body.

* * * * *